# केवलाद्वैतविशिष्टाद्वैताचिन्त्यभेदाभेददिशा सन्न्यासयोगयोरभेदविमर्शः
# kevalādvaitaviśiṣṭādvaitācintyabhedābhedadiśā sannyāsayogayorabhedavimarśaḥ

**Dr. Tridib Roy Mondal**
Assistant Professor, Dept. of Snaskrit,
Diamond Harbour Women´s University
South 24 Parganas, West Bengal, India.
Email: tridibrm@gmail.com

**Abstract:** शोधप्रबन्धेऽस्मिन् फलाभिसन्धिरहितस्य गार्हस्थाश्रमिणः तादृशनिष्काम-कर्मणा शुद्धसत्त्वद्वारेण ध्यानयोगारूढत्वम्, सकामिभ्यः निष्कामिणामुत्कृष्टत्वख्यापनम्, फलतृष्णावन्तं कर्मिणम् अपेक्ष्य निष्कामकर्मिणां स्तुत्यर्थं सन्न्यासित्वकथनम्, निष्कामकर्मयोगविविदिषासन्न्यासयोः फलपरित्यागरूपसाम्यात् चित्तशुद्धिरूपफलसादृश्यात् च निष्कामकर्मिणः सन्न्यासित्वकथनम्, विविदिषासन्न्यासिनः विद्वत्सन्न्यासिनः च स्वरूपम्, विशिष्टाद्वैतभाष्यदिशा कर्मणः ज्ञानापेक्षया श्रेष्ठत्वम्, ज्ञानकर्मयोगयोः परमार्थतोऽभिन्नत्वम्, विद्याभूषणभाष्यदिशा कर्मयोगेन उभयोः ज्ञानकर्मयोगनिष्ठयोः सम्पादनम्, निष्कामकर्मयोगिनः सन्न्यासित्वाष्टाङ्गयोगित्वप्रतिपादनम्, कर्मयोगेन ज्ञानकर्मयोगनिष्ठत्वप्रतिपादनपरकं रामानुजबलदेवविद्याभूषणोक्तं मतं केवलाद्वैतभाष्यदिशा सप्रमाणपुरःसरं खण्डनम्, यमनियमाद्यन्तरङ्गसाधनानुष्ठानाभ्यासरूपः विविदिषासन्न्यास इति शङ्करमतस्य उत्कृष्टत्वम्, सन्न्यासः नाम आत्मयाथात्म्यज्ञानमिति रामानुजमतस्यानुत्कृष्टत्वम्, कृत्स्नेन्द्रियविरतिरूपः सन्न्यास इति बलदेवविद्याभूषणमतस्याप्यनुष्टत्वं चेत्यादयः बहवः राद्धान्ताः श्रीमद्भगवद्गीताभाष्य-ब्रह्मसूत्रभाष्य-गीताभूषणभाष्य-सारार्थदीपिका-गूढार्थदीपिका-वेदान्तपरिभाषा-पञ्चदशीनैष्कर्म्य-सिद्ध्यादिग्रन्थपर्यालोकनेन सप्रमाणं यथामति निगदिताः।

**Keywords:** ब्रह्म, आत्मा, मोक्षः, कर्म, संसारः, अज्ञानम्, सन्न्यासः।

**उपोद्घातः—**

जननमरणात्मके अस्मिन् दुःखस्वरूपसंसारार्णवे कश्चिदेव साक्षात्कृतपरमानन्दः सन् अमृतत्वमनुभवति। भगवत्पादैः शङ्कराचार्यैः विवेकचूडामणौ उक्तं यत् "वाचा वक्तुमशक्यमेव मनसा मन्तुं न वा शक्यते स्वानन्दामृतपुरपुरितपरब्रह्माम्बुधेर्वैभवम्। अम्भोराशिविशीर्णवार्षिक-शिलाभावं भजन्मे मनो यस्यांशांशलवे विलीनमधुनानन्दात्मना निर्वृतम्॥"[1] इति।

भगवद्गीताऽपि स्मर्यते यत् "मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये। यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः॥"[2] इति। इदं दुर्लभं मनुष्यजन्म लब्ध्वा अपि केचन अविवेकिनः यथार्थस्वार्थसाधने उदासीनाः तिष्ठन्ति। एतेषाम् अज्ञानिनाम् उद्धरणाय प्रस्थानेषु मार्ग आदिष्टो वर्तते। "तद्यथेह कर्मचितः लोकः क्षीयते एवमेवामुत्र पुण्यचितः लोकः क्षीयते"[3] इत्यादिवाक्यैः कर्मफलस्यानित्यत्वमुक्त्वा "तत्वमसि"[4], "श्रोतव्यः मन्तव्यः निदिध्यासितव्यः"[5] इत्यादिवाक्यैः ब्रह्मावबोधमार्गाः श्रूयन्ते। उपनिषत्सु प्रतिपादितस्य तत्त्वस्य एव प्रतिपादनं श्रीमद्भगवद्गीतायां विद्यते। जननमरणात्मकात् संसारार्णवात् मोक्तुं श्रीमद्भगवद्गीतायां द्विविधः मार्ग उपदिष्टो वर्तते। सन्यासमार्गः कर्ममार्गश्चेति। अज्ञानिजनबोधाय अयं द्विविधः मार्गः कथितः। वस्तुतस्तु उभयोः मार्गयोरेकत्वमेवास्ति। शोधप्रबन्धेऽस्मिन् कथं तयोरभेद इति शाङ्कररामानुजबलदेव-विद्याभूषणभाष्यदिशा समीक्ष्यते।

**समीक्षणम्**—

कर्मसन्न्यासयोगाख्येऽध्याये कर्मणः सन्न्यसितव्यत्वं श्रुत्वा हीनत्वमाशङ्क्येत इति तदाशङ्कां वारयितुं कर्मणश्च उत्कृष्टत्वं सूचयितुं भगवता श्रीकृष्णेन ध्यानयोगाख्येऽध्याये उच्यते "अनाश्रितः कर्मफलं कार्यं कर्म....योगी भवति कश्चन॥"[6] इति। गार्हस्थाश्रमस्थः ध्यानयोगारोहणेच्छुः फलाभिसन्धिरहितः सन् अग्निहोत्रादीनि कर्माणि करोति चेत् तादृशनिष्कामकर्मणा शुद्धसत्त्वद्वारेण ध्यानयोगारूढो भवति। कर्मफलतृष्णावतः पुरुषात् फलाभिसन्धिरहितः पुरुषोऽत्र सन्न्यासिना योगिना च विशिष्यते। फलतृष्णात्यागोऽत्र सन्न्यासः, चित्तसमाधानमत्र योगशब्देन उच्यते, सकामिभ्यः निष्कामिणामुत्कृष्टत्वख्यापनाय। एवं निष्कामी यद्यपि फलासक्तिरहितो भूत्वा श्रौतं स्मार्तं च कर्म करोति तथापि स फलतृष्णारहितात् सन्न्यासी योगी च कथ्यते। यथा माणवकस्य स्तुत्यर्थं 'सिंहो माणवकः' इति गौणप्रयोगः तथैव फलतृष्णावन्तं कर्मिणम् अपेक्ष्य निष्कामकर्मिणां स्तुत्यर्थं 'कर्मी सन्न्यासी' इत्युच्यते। सन्न्यासिनः कर्मपरित्यागवत् निष्कामकर्मिणोऽपि कर्मफलत्यागः। योगिनः ब्रह्मसमाहितचित्तवत् कर्मी अपि निष्कामकर्मणि चित्तसमाधानं करोति। मनुष्ये सिंहत्वासम्भवेऽपि यथा 'सिंहो माणवकः' इति गौणव्यवहारः तथैव कर्मिणि सन्न्यासित्वं योगित्वं च असम्भवं गौणञ्च। अत्र ध्यानयोगनिष्ठत्वात् ज्ञानयोगनिष्ठत्वात् च योगी सन्न्यासी चेति पृथग्व्यवहारः। गार्हस्थस्य सन्न्यासित्वे योगित्वे च अमुख्ये सत्यपि निष्कामकर्मस्तुत्यर्थं "तं सन्न्यासमिति प्राहुः"[7] इत्युच्यते। अर्थात् निष्कामकर्मयोगं फलपरित्यागलक्षणात् विविदिषासन्न्यासत्वेन जानीहि। यद्यपि प्रवृत्तिलक्षणस्य निष्कामकर्मयोगस्य निवृत्तिलक्षणसन्न्यासेन साकं विरोधोऽस्ति तथापि निष्कामकर्मयोगविविदिषासन्न्यासयोः फलपरित्यागरूपसाम्यात् निष्कामकर्मिणः सन्न्यासित्वकथनम्। न केवलं फलपरित्यागरूपं साम्यम्, अपि च निष्कामकर्मयोगविविदिषासन्न्यासयोः चित्तशुद्धिरूपं फलसादृश्यमपि विद्यते। अतोऽत्र सन्न्यासः नाम चित्तशुद्धिफलहेतुः विविदिषासन्न्यासः। निष्कामकर्मयोगी बहिरङ्गसाधनानि अभ्यस्यति। विविदिषासन्न्यासी तु अन्तःरङ्गसाधनानि अथवा साधनचतुष्टयम्

अभ्यस्यति। द्विविधस्तावत्सन्न्यासी। विविदिषासन्न्यासी विद्वत्सन्न्यासी च। प्रथमस्तु चित्तशुद्ध्यर्थं प्रयतमानो भवति। द्वितीयस्तु तत्त्वज्ञानसाक्षात्कारात् यस्य कर्तृत्वबुद्धिः नष्टा सः स्वभावतः परित्यक्ताशेषकर्मा विद्वत्सन्न्यासी।

ध्यानयोगेऽस्मिन् ज्ञानयोगेन कर्मयोगेन च कथम् आत्मसाक्षात्काररूपः योगोऽभ्यस्यते इत्येतत्कथ्यते। ज्ञानयोगानपेक्षतया स्वतन्त्रतया कर्मयोग आत्मसाक्षात्कारे समर्थः। एवञ्च कर्मयोगे ज्ञानांशस्यापि विद्यमानात् कर्मयोगस्यैव ज्ञानयोगापेक्षया श्रेष्ठत्वमुच्यते। फलाभिसन्धिरहिततया कर्तव्यपरायणो भूत्वा कर्म कुर्वन्, आत्मन एव प्रियत्वज्ञानेन आत्मसेवैव मम प्रयोजनम्, न तु कर्मफलम् इत्येवं बुद्धियुक्तो पुरुषः ज्ञानयोगनिष्ठः सन्न्यासी। एतेन सन्न्यासिना कर्मज्ञानयोगाचरितत्वात् एष ज्ञानयोगी कर्मयोगी चोभावपि। किन्तु यः सन्न्यासी शास्त्रविहितानि यज्ञादीनि कर्माणि न करोति, कर्मरहितः सन् तिष्ठति स केवलं ज्ञाननिष्ठः। किन्तु कर्मयोगी कर्मणि ज्ञाने च उभयत्र निष्ठासम्पन्नो भवतीत्यतः कर्मणः ज्ञानापेक्षया श्रेष्ठत्वम्। एवञ्च कर्मणि ज्ञानयोगस्यापि अन्तर्भाव इत्यतः सन्न्यासरूपज्ञानयोगेन कर्मयोगाभेदः। रामानुजाचार्यैरुच्यते "यं सन्न्यासमिति..."[8] इति। यथा आत्मयाथाम्यज्ञानी कर्तृत्वममत्वफलाभिसन्ध्यादिरहितो भवति तथैव निष्कामकर्मयोगी फलाभिसन्धिरहितो भवति। निष्कामकर्मिणः फलानभिमानजन्यचित्तविक्षेपाभावात् चित्तसमाधानभावात् च योगित्वम्। निष्कामकर्मयोगी आत्मयाथात्म्यज्ञानी च आत्मयाथात्म्यानुसन्धानेन अनित्यायां प्रकृतौ आत्मबुद्धिं परित्यजति। अतः ज्ञानकर्मयोगयोः परमार्थतोऽभेद एव।

सर्वेश्वरस्य परमात्मन आराधनेन सुखं लभते। तच्च सुखं चञ्चले मनसि नोपलभते। तस्य च चञ्चलमनसः नैश्चल्याय उपायोऽधुना कथ्यते। यमनियमासनप्राणायामप्रत्याहारधारणा-ध्यानसमाधिरूपाष्टाङ्गयोगाभ्यासे प्रवृत्तः चित्तशोधनेच्छुः पुरुषः निष्कामं कर्म अवश्यं कुर्यात्। स्त्रीपुत्रभार्यान्नवनितादिषु सकामेषु विषयेषु निरासक्तो भूत्वा फलाभिसन्धिरहितः सन् शास्त्रविहितं कर्म कर्तव्यबुद्ध्या यः करोति स ज्ञानयोगनिष्ठत्वात् सन्न्यासी, पुत्रान्नवनितादिषु चित्तवृत्त्यभावात् यमनियमाद्यष्टाङ्गेषु च प्रवृत्तत्वात् योगनिष्ठः योगी अपि निगद्यते। ज्ञानयोगेन ज्ञानयोगनिष्ठत्वमेव सम्पाद्यते। किन्तु कर्मयोगेन उभौ ज्ञानकर्मयोगनिष्ठौ सम्पाद्येते। केवलम् अग्निहोत्रादिकर्मत्यागी सन्न्यासी नोच्यते, मनसि तृष्णायाः सत्त्वात्। एवञ्च केवलं दैहिकचेष्टारहितः निमीलितनेत्रयुक्तः पुरुषः योगी न कथ्यते, यमनियमाद्यननुष्ठीयमानत्वात्। यमनियमादीनामपि कर्मण्यन्तर्भूतत्वात् शास्त्रविहितं कर्म तु फलाभिसन्धिरहिततया अनुष्ठेयम् इति कर्मणः स्तुतिरत्र विधीयते। निष्कामकर्मयोगिनः सन्न्यासित्वम् अष्टाङ्गयोगित्वं च सम्भवमेव, निष्कामकर्माष्टाङ्गयोगसन्न्यासयोः परस्पराविरोधात्। सकलेन्द्रियविरतिरूपं सन्न्यासं चित्तवृत्तिनिरोधरूपयोगं विद्धि। सन्न्यासावस्थायां यथा कर्मफलतृष्णात्यागः तिष्ठति तथैव योगावस्थायां चित्तवृत्तिनिरोधात् कर्मफलतृष्णा नैव तिष्ठति। अतः सन्न्यासयोगयोरभेदः। पूर्वं भगवता "साङ्ख्ययोगौ पृथग्बालाः..."[9] इत्यादिना साङ्ख्यकर्मणोरेकत्वं प्रतिपाद्य अधुना साङ्ख्ययोगयोरभेदः कथितः।

वस्तुतस्तु कर्मज्ञानयोगानां परस्परं भेदोऽस्ति। किन्तु फलतृष्णात्यागरूपसाम्यात् गौणवृत्त्या 'सिंहो माणवकः' इतिवत् तेषाम् अभेदः निगदितः।

कर्मयोगनिष्ठस्य ज्ञानयोगनिष्ठत्वम् असम्भवम् इति शङ्करमतम्। कर्मयोगेन ज्ञानयोगनिष्ठत्वमपि सम्भवम् इति रामानुजबलदेवविद्याभूषणमतम्। लोके सन्न्यासिनः कर्मणि प्रवृत्त्यभावः ज्ञाननिष्ठा च परिलक्ष्यते, गृहस्थस्य तु तद्विपरीतम्। ज्ञानकर्मणोश्च फलतः वस्तुतः प्रतीतेश्च विरोधः परिलक्ष्यते। कर्मणां स्वर्गादिफलत्वात् ज्ञानस्य च मोक्षफलत्वात् , कर्मणोऽनित्यत्वात् ज्ञानस्य च नित्यत्वात्, ज्ञानिनाम् आसक्तिहीनव्यवहारप्रतीतेः कर्मिणां च आसक्तियुक्तव्यवहारप्रतीतेः विरोधोऽस्ति एव। यदि कर्मयोगनिष्ठस्य ज्ञानकर्मोभयनिष्ठत्वं सम्भवेत् तर्हि "ज्ञानयोगेन साङ्ख्यानां..."[10], "आरुरुक्षोर्मुनेर्योगं कर्म..."[11] इति भगवदुक्तिः व्यर्था स्यात्। यतो हि भगवता श्रीकृष्णेन स्वयमेव कर्मिणां कर्मयोगनिष्ठत्वं ज्ञानिनां च ज्ञानयोगनिष्ठत्वमुक्तम्। अतः रामानुजमतापेक्षया भगवद्वचनस्य परमप्रमाणभूतत्वात् रामानुजमतमस्माभिः विवेच्यम्।

एवञ्च "यं सन्न्यासमिति..."[12] इत्यत्र सन्न्यासशब्दार्थविषये शङ्कररामानुजबलदेवविद्या-भूषणाचार्याणां परस्परं मतभेदो विद्यते। अत्र सन्न्यासः नाम यमनियमाद्यन्तरङ्ग-साधनानुष्ठानाभ्यासरूपः विविदिषासन्न्यास इति शङ्करमतम्। सन्न्यासः नाम अत्र आत्मयाथात्म्यज्ञानमिति रामानुजमतम्। कृत्स्नेन्द्रियविरतिरूपः सन्न्यासोऽत्र बलदेवविद्याभूषणाचार्यैरभिप्रेतः। विचार्यमाणे सत्यत्र शङ्करमतं समीचीनं भाति। यतो हि विविदिषासन्न्यासनिष्कामकर्मणोः फलतृष्णात्यागरूपं सादृश्यं विद्यते। एवञ्च विविदिषासन्न्यासी यथा निष्कामबुद्ध्या अन्तरङ्गसाधनरूपं कर्म अभ्यस्यति तथैव निष्कामकर्मी अपि ईश्वरार्पणबुद्ध्या निष्कामतया कर्म आचरति। अत उभाभ्यामपि कर्मण आचर्यमाणत्वात् बाहुल्येन विविदिषासन्न्यासनिष्कामकर्मणोः सादृश्यं प्राप्यते। आत्मयाथात्म्यज्ञानमित्यस्य भगवदंशत्वादिनिश्चयरूपं ज्ञानम् अङ्गीक्रियते चेत् रामानुजमतमपि सर्वैः ग्रहणयोग्यम्।

परमात्मयाथात्म्यज्ञाने सति अशेषकर्मणां निवृत्तिर्भवति। यद्यपि क्वचित् उन्मार्गप्रवृत्तिनिवारणार्थम् आत्मज्ञानिनां निष्कामकर्म दृश्यते तथापि तत् लोकशिक्षार्थम् ईश्वरार्पणबुद्धियुक्तम्। किन्तु आत्मज्ञाने सति आत्मयाथात्म्यज्ञानी जानाति यत् 'ईश्वरोऽहम्' इति। अतः स्वयम् ईश्वरो भूत्वा ईश्वरार्पणबुद्ध्या कर्म असम्भवमेव। ब्रह्मज्ञानिनः ब्रह्मत्वाभेदे आत्मयाथात्म्यज्ञानस्य च अशेषकर्मोपरमत्वे "ब्रह्म वेद..."[13], "क्षीयन्ते चास्य..."[14], "ज्ञानाग्निस्सर्वकर्माणि..."[15] चेत्याद्याः श्रुतयः स्मृतयश्च प्रमाणानि भवन्ति। तस्मात् लोकानुग्रहार्थमेव ज्ञानिनां कर्म रामानुजाचार्यैरङ्गीक्रियते चेत् रामानुजमतमपि समीचीनं ब्रूमः।

एवञ्च सर्वेन्द्रियविरतिरूपसन्न्यासशब्दार्थोऽत्र प्राज्ञैः विचारणीयः, सर्वेन्द्रियविरतिरूप-सन्न्यासशब्दार्थस्य शास्त्रादिषु अप्रसिद्धत्वात्, सन्न्यासावस्थायां च केषाञ्चित् इन्द्रियाणां वृत्तिसद्भावात्। अपि च सन्न्यासावस्थायां क्वचित् लोकशिक्षार्थं जनकादीनां निष्कामं कर्म परिलक्ष्यते। किन्तु चित्तवृत्तिनिरोधावस्थायां न किञ्चिदपि कर्म परिलक्ष्यते। शास्त्रादिषु

ईश्वरार्पणबुद्ध्या फलाभिसन्धिरहिततया निष्कामकर्म इष्टम्। किन्तु चित्तवृत्तिनिरोधावस्थायाम् ईश्वरार्पणबुद्धेरविद्यमानात् निष्कामकर्म असम्भवमेव। अतः बलदेवविद्याभूषणमतम् अपि चिन्त्यम्। किन्तु सर्वेन्द्रियविरतिशब्देन विषयभोगेषु इन्द्रियाणामप्रवृत्तिरङ्गीक्रियते चेत् बलदेवविद्याभूषणमतमपि समीचीनं भाति।

**उपसंहारः—**

अस्मिन् शोधप्रबन्धे फलाभिसन्धिरहितस्य गार्हस्थाश्रमिणः तादृशनिष्कामकर्मणा शुद्धसत्त्वद्वारेण ध्यानयोगारूढत्वम्, सकामिभ्यः निष्कामिणामुत्कृष्टत्वख्यापनम्, फलतृष्णावन्तं कर्मिणम् अपेक्ष्य निष्कामकर्मिणां स्तुत्यर्थं सन्न्यासित्वकथनम्, निष्कामकर्मयोगविविदिषा-सन्न्यासयोः फलपरित्यागरूपसाम्यात् चित्तशुद्धिरूपफलसादृश्यात् निष्कामकर्मिणः सन्न्यासित्वकथनम्, विविदिषासन्न्यासिनः विद्वत्सन्न्यासिनः च स्वरूपम्, विशिष्टाद्वैतभाष्यदिशा कर्मणः ज्ञानापेक्षया श्रेष्ठत्वम्, ज्ञानकर्मयोगयोः परमार्थतोऽभिन्नत्वम्, विद्याभूषणभाष्यदिशा कर्मयोगेन उभयोः ज्ञानकर्मयोगनिष्ठयोः सम्पादनम्, निष्कामकर्मयोगिनः सन्न्यासित्वाष्टाङ्गयोगित्व-प्रतिपादनम्, कर्मयोगेन ज्ञानकर्मयोगनिष्ठत्वप्रतिपादनपरकं रामानुजबलदेवविद्याभूषणोक्तं मतं केवलाद्वैतभाष्यदिशा सप्रमाणपुरःसरं खण्डनम्, यमनियमाद्यन्तरङ्गसाधनानुष्ठानाभ्यासरूपः विविदिषासन्न्यास इति शङ्करमतस्य उत्कृष्टत्वम्, सन्न्यासः नाम आत्मयाथात्म्यज्ञानमिति रामानुजमतस्यानुत्कृष्टत्वम्, कृत्स्नेन्द्रियविरतिरूपः सन्न्यास इति बलदेवविद्याभूषणम-तस्याप्यनुष्टत्वं चेत्यादयः बहवः राद्धान्ताः दशोपनिषद्भाष्य-श्रीमद्भगवद्गीताभाष्य-ब्रह्मसूत्रभाष्य-गीताभूषणभाष्य-सारार्थदीपिका-गूढार्थदीपिका-वेदान्तपरिभाषा-पञ्चदशीनैष्कर्म्यसिद्ध्यादिग्रन्थप-र्यावलोकनेन सप्रमाणं यथामति प्रतिपादिता इति शिवम्।

## Endnotes

1. विवेकचूडामणिः- ४८२
2. श्रीमद्भगवद्गीता- ७/३
3. छान्दोग्योपनिषदि (८-१-६) इति।
4. छान्दोग्योपनिषदि (६.८.७) इति।
5. बृहदारण्यकोपनिषदि (२-४-५)इति।
6. श्रीमद्भगवद्गीता- ६/१,२
7. श्रीमद्भगवद्गीता- ६/२
8. श्रीमद्भगवद्गीता(रामानुजभाष्यं बङ्गानुवादसहितम), पृष्ठाङ्कः- २०२-२०३
9. श्रीमद्भगवद्गीता- ५/४
10. श्रीमद्भगवद्गीता- ३/३
11. श्रीमद्भगवद्गीता- ६/३
12. श्रीमद्भगवद्गीता- ६/२
13. मुण्डकोपनिषत्- ३/२/९

14. मुण्डकोपनिषत्- २/२/९
15. श्रीमद्भगवद्गीता- ४/३७

## Bibliography


- अश्वघोषः। *बुद्धचरितम्*। पाण्डेयः, श्रीकान्तः(सम्पादकः)। वाराणसीः चौखम्बा संस्कृत सीरीज अफिस। २००४।
- Nagarajuna। *mūlamādhyamikakārikā*। J. Kalupahana, David (Secretary)। Delhi: Motilal Banaras Publishers Private Limited। 2006।
- माधवाचार्यः। *सर्वदर्शनसङ्ग्रहः* (सपरिशिष्टः "प्रकाश"-हिन्दीभाष्योपेतः)। ऋषि, उमाशङ्करः (भाष्यकारः)। वाराणसीः चौखम्बा विद्याभवन। २०१४।
- *तैत्तिरीयोपनिषत्* (बङ्गपुस्तकम्, शाङ्करभाष्यसमेता)। दूर्गाचरणसांख्यवेदान्ततीर्थः, महामहोपाध्यायः (अनुवादकः सम्पादकश्च)। कलिकाताः देव-साहित्य-कूटीर-प्राइभेट-लिमिटेड। २००८।
- *छान्दोग्योपनिषत्* (बङ्गपुस्तकम्, शाङ्करभाष्यसमेता)। दूर्गाचरणसांख्यवेदान्ततीर्थः, महामहोपाध्यायः(अनुवादकः सम्पादकश्च)। कलिकाताः देव-साहित्य-कूटीर-प्राइभेट-लिमिटेड। २००२।
- *ईशादि नौ उपनिषत्* (शाङ्करभाष्यसमेता)। गोरखपुरः गीताप्रेस (प्रकाशक एवं मुद्रक)। सं.-२०६८।
- *कठोपनिषत्* (बङ्गपुस्तकम्)। भूतेशानन्दः, स्वामी (अनुवादकः व्याख्याकारश्च)। कलिकाताः उद्बोधन -कार्यालयः। २००९।
- *उपनिषद्भाष्यम्* (प्रथमखण्डः, श्रीमदानन्दगिर्याचार्यकृतटीकया कठ-माण्डूक्य-तैत्तिरीयभाष्याणां प्रसिद्धाचार्यान्तरटीकाभिः सटीकतैत्तिरीयवार्तिकेन च समलङ्कृतम्)। सं. एस. सुब्रह्मण्यशास्त्री (सम्पादकः)। वाराणसीः श्रीदक्षिणामूर्ति-मठ-प्रकाशन। २०००।
- व्यासदेवः। २०००। *श्रीमद्भगवद्गीता*। वासुदेवानन्दः (अनुवादकः व्याख्याकारश्च)। कलकाता: उद्बोधनकार्यालयः।
- व्यासदेवः। *श्रीमद्भगवद्गीता.* श्रीपादविश्वनाथचक्रवर्तिमहोदयविरचित-सारार्थवर्षिणीटीकया एवं श्रीयुतबलदेवविद्याभूषणमहोदयविरचित-गीताभूषणभाष्येण समलङ्कृता. प्रकाशकः- कृष्णदासबाबा. मथुरा: राधाकुण्ड, कुसुमसोवर। २०२३।
- महर्षिपतञ्जलिः। *पातञ्जलयोगदर्शनम्* (व्यासभाष्यसम्बलितं तच्च योगसिद्धि-हिन्दी-व्याख्योपेतम्)। व्याख्याकारः- सुरेशचन्द्रश्रीवास्तवः। वारणसी: चौखम्बा सुरभारती प्रकाशन। २००८।
- विश्वारूपानन्दः, स्वामी। *वेदान्तदर्शनम्*। कलिकाता: उद्बोधन-कार्यालयः। २०१७।
- व्यासदेवः। *श्रीमद्भगवद्गीता* (बङ्गपुस्तकम्)। अनुवादकः व्याख्याकारश्च- स्वामी वासुदेवानन्दः। कलिकाता: उद्बोधन-कार्यालयः। २०१४।
- व्यासदेवः। *श्रीमद्भगवद्गीता* (श्रीरामानुजभाष्य-हिन्दी-अनुवादसहिता)। अनुवादकः- श्रीहरिकृष्णदासगोयेन्दका। गोरखपुरः गीताप्रेस। सं.- २०६४।
- व्यासदेवः। *श्रीमद्भगवद्गीता* (अष्टटीकोपेता)। सम्पादकः- प. वासुदेवलक्ष्मणशास्त्री-पणशीकरः। दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान। २००९।